स्वर्कविकारः पूंगितिमयूरवे

पथार्द्ध

जांदिवकक्ष्मि विभागे
अर्द्धविवाहः पत्र ६
८०

२

श्री॥ प्रयोगरत्ने॥ तृतीयां मानुषीं नैव चतुर्थीं पः समुद्वहेत्। पुत्रपौ
त्रादिसंपन्नः कुटुंबी साग्निको ज्वरः। उद्वहेदुक्तिसिध्यर्थं तृतीयां न कदा
चन। मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीं। नश्यत्येव न संदेहो ग
र्गस्य वचनं यथेति। तत्रैव संग्रहे। तृतीयां यदि चोद्वाहेत्तर्हि सा
विधवा भवेत्। चतुर्थादिविवाहार्थं तृतीये त्वर्कं समुद्वहेत्। आदित्य
दिवसे वापि हस्ते वा पाशनैश्चरे। शुभे दिने वा पूर्वाह्णे कुर्यादर्कवि
वाहकं। व्यासः। स्नात्वा लंकृतवासास्तु रक्तगंधादिभूषितः॥
सपुष्पफल[illegible]रेवार्कगुल्मं समाश्रयेत्॥ सलुसत्तो न संयुक्तं त्वर्कं
संस्थाप्य पत्नलः॥ अर्ककन्याप्रदानार्थं माचार्यं कल्पयेत्पुरा॥ अर्कस्यं

निधिमार्गस्पतत्रस्यस्यादिवाचयेत्॥ नांदिश्राद्धेहिरण्येनत्रत्रस्ववर्गान्
पुपूजयेत्। पूजयेनमधुपर्केण। वरांविप्रस्यहस्ततः। यज्ञोपवीतं
वस्त्रंचहस्तकर्णादिभूषणं। उष्णीषगंधमाल्यादि वरायास्मै
प्रदापयेत्। स्वशाखोक्तप्रकारेण मधुपर्कंसमाचरेत्। आलेख्यामातृश्च
च्चामुंदीच्चां वासुपुष्पपूजसंयुतां। परीच्चयत्नलाधस्तात्स्थंडिलादि
यथाविधि। ऊर्ध्वादितिरोबनंस्त्वा वंपुरतस्तिष्ठंनृप्रार्पयेत्। द्विजोत्त
मः। त्रिजोकवासिनसदा श्वछायपयासहितोवरोत्तीयोद्भा हज्ञं
दोषंनिवारयसुखंकुरु। तत्राध्यारोप्यदेवंसछाययासहितंरविं। वस्त्रैर्मा
ल्यौस्तथागंधैस्त मंत्रेणैवपूजयेत्॥ तत्रैवमध्ये नवस्त्रेणतथाकार्यासतंतु
भिः॥ गंधपुष्पैसमभ्यर्च्याद्विरेगैरभिविच्यच। गुडोदनतुनैवेद्यंतांबूलंच
समर्पयेत्॥ व्यासः॥ अर्कंप्रदक्षिणीकुर्वन् जपेन्मंत्रमिमंबुधः॥ ममप्रीतिकरायं

२

यंमयास्त्रष्टापुरातनी॥ अर्कजा ब्रह्मणा स्रष्टा अस्माकं प्रतिरक्षतु॥ पुनः प्रदक्षि
णीकुर्यात् मंत्रेणानेन मंत्रवित्॥ नमस्ते मंगले देवि नमः सवितुरात्मजे॥ त्रा
हि मां कृपया देवि पत्नी त्वं मे इहागता॥ अर्क त्वं ब्रह्मणा स्रष्टः सर्वप्राणिहिता
य च। वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः॥ तृतीयोद्वाहजं पापं मृत्युं चा
विनाशय॥ ततः कन्यावरणं त्रिपुरुषं तु समुच्चरेत्॥ आदित्यः सविता चार्कः पुत्री पौत्री
वनप्रिका॥ गोत्रं काश्यपमित्युक्तं लोके सौ कि क्रमाद्वरेत्॥ सूर्यं दूर्वे निरीक्षेत सुस्त्रि
त्वमुदीरयन्॥ आशीर्भिस्सहितैः कुर्यात्स्वापत्रमुखैर्द्विजैः॥ आधाय वार्यसमाहूय विधिना
विप्रयपाशं कि विभूषितां गोत्रापशर्मणे तु स्यं दत्तां विप्र समाश्रयेत्॥ अर्कं कन्यामिमां
मणि कृत्वा कंकणपूर्वकं॥ यावत्पंचावृत्त सूत्रं तावदर्के प्रवेष्टयेत्॥ स्वशाखोक्तेन
मंत्रेण गायत्र्या वा प्रवाजपेत्। पंचीकृत्य पुनः सूत्रं स्कंधे बध्नाति मंत्रतः॥ इह सा मे मि
मंत्रेण सूत्रं रक्षां प्रकल्पयेत्॥ अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्तथा॥ कुंभां
श्च निक्षिपेत्तस्याद्राग्नेया दिवतुष्टये॥ सर्व स्वं यतिं कुंजेव विरत्त्वं नैवैद्यं तथा॥

हरिद्रागंधसंयुक्तं धूपयेच्छितन्तुलैं जलैंोत्रतिकुंभेमहाविष्णुं संपूज्यपरमेश्वरं।

पाद्यार्घाद्यादिनिवेद्यातं कुर्यान्नाम्नैवमंत्रवित्॥ अत्रशौनकोक्तोहो

मप्रकारः॥ तृतीये स्त्रीविवाहे तुसंप्राप्ते पुरुषस्यतु॥ अर्कविवाहंवक्ष्या

मिशौनकोहंविधानतः॥ अर्कसंनिधिमागत्यतत्रस्वस्त्यादिवाचये

त्॥ नांदिश्राद्धंप्रकुर्वीतस्थंडिलंचप्रकल्पयेत्॥ अर्कमभ्यर्च्यसौर्या

वैगंधपुष्पाक्षतादिभिः॥ स्योर्यस्सूर्यदैवत्ययाप्तचार्चा॥ आदस्मिने

त्यनया॥ स्वपंवाजंदृत्ततस्तद्दूस्त्रमाल्यादिभिः शुभैः॥ अर्कस्याचार

देशेतुसमत्वारश्च एतया॥ एसया॥ अर्कन्यया॥ उद्धरेरवनादिर्कं कुर्या।

दाधारांतममतः परं। आज्याहुतिं जुहुयात् संवगोऽग्निरनयैक स्या।
कस्मैत्वा काम कामायेत्ययेतया वलितः परं। व्यस्ताग्निग्रसम
३ स्ताभित तन्त्रवस्विष्टकृद्भवेत्। परिषिंचेन पर्येतं मयान्वे त्यादिके
क्रमात्। प्रार्थना मंत्रादि विशेषमाहव्यासः। पुनः प्रदक्षिणं कृ
त्वा मंत्रमेतमुदीरयेत्॥ मया कृतमिदं कर्म स्थावरेषु जरायुषु॥
अर्कापत्यानि नोदद्रि तत्सर्वं सनुमह सिफत्को शालिसूक्ता
नि जरेद्धाते विसर्जेत्पुनः। गोयुग्मं दक्षिणां दद्यादाचार्याय प्रश्नभ
क्तितः। द्रतरस्रेन्पञ्च विप्रेभ्यो दक्षिणां यथाशक्तितः॥ तस्स

वैं गुरवे दद्याद्दंतेयुग्याहमाचरेत्॥ ॥अथ प्रयोगः। तृतीय विवाहस्यादिन
चतुष्टयाधिकव्या वा हिलेर विवारे शनिवारे हस्तनक्षत्रे शुभे दिनांतरे वा या
पु३ मातृश्राव्यामुदीच्यां वा [illegible] कजयुलाकं धस्तात्स्थंडिले कृत्वार्कपा[illegible] मत
उपविश्य मासपक्षाद्युल्लिख्य मम तृतीयमानुषीविवाहज दोषापनुत्यर्थं त्र
र्कविवाहं करिष्ये। [illegible] तिसंकल्प्य गणेशपूजा स्वस्तिवाचन मातृपूजन वृद्धि
श्राद्धाचार्यवर्णानि कुर्यात्। वृद्धिश्राद्धं हेम्ना। अथाचार्येणपूजितो वरः॥ त्रै
जो लोक्यवासिन् सप्ताश्वछायया सहितो रवे॥ तृतीयोद्वाहज दोषनिवारय सुखं
कुरु॥ इत्यर्कं संप्राप्य [illegible] आदित्याय नमेति छायासहितं रविं [illegible] वस्त्र

सूत्राभ्यां नावेष्ट्य संपू- ज्यापो हिष्ठेत्यादिभिरभिषिच्य गुडोदनतांबूलादि
समर्प्य प्रदक्षिणीकुर्वन मम प्रीतिकरा पेयं मया सृष्टा पुरातनी॥ अर्कजा ब्रह्म
णा सृष्टा अस्माकं प्रतिरक्षयेतिपठेत्॥ द्वितीयपदक्षिणायां तु नमस्ते मं
गले देवि नमः सवितुरात्मजे॥ त्राहि मां कृपया देवि पत्नी त्वं मे इहागता॥ अ
र्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय वै॥ वृक्षाणामादिभूतस्त्वं देवानां प्री
तिवर्द्धनः॥ द्वितीयोद्वाहजं पापं मृत्युं चाशु विनाशयेति॥ ततस्त्वाचार्येणामा
सपत्नाद्य, छित्त्रस्य काश्यपगोत्रामादित्यस्य पुत्रीं सवितुः पौत्रीं अर्कस्य
प्रपौत्रीमिमाम र्ककन्यामित्युक्त्वे वरस्य स्वस्ति न इंद्रो वृद्धश्रवा इति॥ सूक्त

पठनकं निरीक्षेत्॥ ततश्चाचार्यो विप्रैः सह शिवो दद्याममुकसगोत्रायामुक
शर्मणे संप्रददे इत्यर्क कन्यां दत्वार्कन्यामिमां विप्र यथाशक्ति विभूषितां॥
गोत्रापशर्मणे तुभ्यं दत्तां विप्र समाश्रये तिपठेत्॥ वरस्तु यशो मे कामममः स
मतामिति अपमां धर्मोमि इति द्वितीयांय शोमह ति तृतीयामिति त्रीन दत्तां ज
जीनकों पारि क्षिप्त्वा गायत्र्या परित द्वेयादि नावा पंचाह तास्त्रेणार्कमावेष्ट्य
तसूत्रं पुनः पं चगुणं कृत्वा र्कस्य स्कंधे बध्नाद्वहस्पामेति रक्षां परिकल्प्यार्क
स्य दिग्विदिक्ष्वष्टौ कुंभान् संस्थाप्य वस्त्रेणात्रिः सूत्रे ए चावेष्ट्य हरिद्रा
गंधाद्यं तक्षिप्त्वा तेषु नाम्नाम हाविष्णुमहावाह्यपो शोपचारैः संपूज्य स्वोडि
लोग्निं प्रतिष्ठाप्य आधारा वाज्येनेत्यं तमुश्चात्प्रधानं वृहस्पतिमग्निम

५ यु १

ग्निसूर्यं प्रजापतिं व्याज्येन शेषेण त्याद्धाकाधारांते संगोपिगिरां इहस्पतिस्त्रिष्टुप्।
अर्थं विवाहे होमे विनियोगः। ॐ संगोपिरां गिरसो नक्षमाणो भगाइवेदर्यमणं
निनाय। जनेमित्रो नदंपती अनक्ति इहस्पते वाजयाशूं रिवा जोस्वाहा। इहस्पत
य इदं नमम। इति त्यजेत्। यस्मै त्वा मदेवो अग्निस्त्रिष्टुप्। विनियोगः प्राग्वत्। ॐ यस्मै त्वा
कामकामाय वयं सम्राजा यजामहे। तम ... स्मभ्यं कामं दत्त्वपिदंध तं पिब स्वाहा। अग्नय
इदं न मम। ततः समस्त व्याहृतिभिर्हुत्वा स्विष्टकृदादि कर्मशेषं समाप्य अर्कप्रद
क्षिणीकृत्य मिदं कर्मस्थावरेषु जरायुणा॥ अर्कोपत्या निनोदेहि तस्सर्वं दत्तुम
र्हसीति प्रार्थ्य आचार्याय गोयुग्ममन्येभ्यश्च विप्रेभ्यो यथाशक्ति दक्षिणां दत्त्वा शां
ति सूक्तं जपित्वा पूज्योपस्करा नाचार्याय दत्त्वा दिनवतुष्टयमग्निं कुंभं च र
क्षेत्। कुंभपशुमहाविष्णुं पूजयेच्च। पंचमादिन ... त्यं बाह्ये। वनुषे दिवसे तीति

र्देवतांश्च सृज्य च॥ विसृज्य होममग्निं च विधिनामात्तु षीयरो। उद्वहेद्न्यया नेव पुत्रपौत्र स
मृद्धिमान्॥ ॥ इति श्रीभट्टनीलकंठकृते भा.स्करे शांतिमयूखे ऽर्कविवाहः॥

6

पत्र६ शांतिमजू१४